समयः – होराद्वयम् । गुणाङ्काः – ५०

**सूचना** :
१) सर्वासु कृतिषु वाक्यानां पुनर्लेखनम् आवश्यकम् ।
२) यथासूचनम् आकलनकृतयः व्याकरणकृतयः आरेखितव्याः ।
३) आकृतीनाम् आलेखनं मसीलेखन्या कर्तव्यम् ।

## प्रथमः विभागः – सुगमसंस्कृतम् (१०)

(१) अ) चित्रं दृष्ट्वा नामानि लिखत । (५ तः ४) ४

१) 
२) 
३) 
४) 

५) 


__________ __________ __________ __________ __________

आ) सङ्ख्याः अक्षरैः / अङ्कैः लिखत । (३ तः २) २

१) पञ्चपञ्चाशत् २) ७८ ३) चतुर्दश

इ) समय–स्तम्भमेलनं कुरुत। २

| अ | आ |
|---|---|
| १) पादोन–पञ्चवादनम् । | १) ९.५० |
| २) विंशत्यधिक–सप्तवादनम् । | २) २.०० |
| ३) द्विवादनम् । | ३) ४.४५ |
| ४) दशोन–दशवादनम् । | ४) ७.२० |

ई) वासर–तालिकां पूरयत । (३ तः २) २

| परह्यः | ......... | अद्य | श्वः |
|---|---|---|---|
| .......... | सोमवासरः | मङ्गलवासरः | ........... |

## द्वितीयः विभागः – गद्यम् । (१६)

**२) अ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।** ५

(अर्णवः जपाकुसुमं गृहीत्वा प्रविशति । तस्य पिता विज्ञानस्य प्राध्यापकः । सः पुस्तकपठने मग्नः। तस्य पार्श्वे उत्पीठिकायां सूक्ष्मेक्षिका वर्तते ।)

अर्णवः –पितः, अस्माकम् उद्यानाद् जपाकुसुमम् आनीतं मया । कियन्तः सूक्ष्माः तस्य परागकणाः !

पिता – सूक्ष्मेक्षिकया पश्य, तेषां कणानां रचनाम् अपि द्रष्टुं शक्नोषि ! (अर्णवः तथा करोति ।)

पिता – किं दृष्टं त्वया?

अर्णवः– पितः, अद्भुतम् एतत् । अत्र परागकणस्य सूक्ष्माणि अङ्गानि दृश्यन्ते।

पिता – अर्णव, एतानि पुष्पस्य अङ्गानि त्वं सूक्ष्मेक्षिकया द्रष्टुं शक्नोषि। परन्तु एतद् विश्वं परमाणुभ्यः निर्मितम्। ते परमाणवः तु सूक्ष्मेक्षिकया अपि न दृश्यन्ते ।

अर्णवः– परमाणुः नाम किम्?

पिता – अस्तु । कथयामि । मुष्टिमात्रान् तण्डुलान् महानसतः आनय ।

अर्णवः – (तथेति उक्त्वा पाकगृहात् तण्डुलान् आनयति।) स्वीकरोतु, भवान् ।

पिता – अधुना इमं तण्डुलं विभज ।

अर्णवः – तात, कियान् लघुः अस्ति एषः । पश्यतु, एतस्य भागद्वयं यथाकथमपि कृतं मया ।

१. अवबोधनम् । (४ तः ३) ३

**क) उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत ।** १

च) अस्माकम् ............. जपाकुसुमम् आनीतं मया । (उद्यानात् / उद्याने)

छ) अर्णवः पाकगृहात् ............ आनयति । ( तण्डुलाः / तण्डुलान्)

**ख) पूर्णवाक्येन उत्तरं लिखत ।** १

एतद् विश्वं केभ्यः निर्मितम् ?

**ग) वाक्यं पुनर्लिखित्वा सत्यम्/असत्यम् इति लिखत ।** १

परमाणवः सूक्ष्मेक्षिकया दृश्यन्ते ।

**घ) एषः गद्यांशः कस्मात् पाठात् उद्धृतः ?** १

२. शब्दज्ञानम् । (३ तः २) २

**क) २ तृतीयाविभक्त्यन्तपदे चित्वा लिखत ।** १

**ख) गद्यांशात् विशेषण–विशेष्य–मेलनं कुरुत।** १

| विशेषणम् | विशेष्यम् |
|---|---|
| १) सूक्ष्माः | तण्डुलान् |
| २) मुष्टिमात्रान् | जपाकुसुमम् |
| | परागकणाः |

**ग) लकारं लिखत । सूक्ष्मेक्षिकया <u>पश्य</u> ।** १

२) आ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत । ⑤

एकदा पृथुराजः स्वराज्ये भ्रमणम् अकरोत् । भ्रमणसमये तेन दृष्टं यत् प्रजाः अतीव कृशाः अशक्ताश्च । ताः प्रजाः पशुवज्जीवन्ति । निकृष्टान्नं खादन्ति । तद् दृष्ट्वा राजा चिन्ताकुलः जातः । तदा पुरोहितोऽवदत्, ''हे राजन्, धनधान्यादि सर्वं वस्तुजातं वस्तुतः वसुन्धरायाः उदर एव वर्तते । तत्प्राप्तुं यतस्व ।''
तदा पृथुभूपेन तदर्थं धनुः सज्जीकृतम्। तदा भूमिः स्त्रीरूपं धृत्वा तस्य पुरतः प्रकटिता अभवत् अवदत् च, ''हे राजेन्द्र! तव पिता दुःशासकः वेनराजः राजधर्मस्य पालनं नाकरोत्। तदा मया चोरलुण्ठकभयात् धनधान्यपुष्पफलानि मम उदरे निहितानि । त्वं तु प्रजाहितदक्षः नृपः । यदि त्वं प्रयत्नेन कृषिकार्यं करोषि तर्हि अहं प्रसन्ना भविष्यामि। अतः धनुः त्यज । खनित्राणि, हलान्, कुद्दालकान् लवित्राणि च हस्ते गृहीत्वा प्रजाजनैः सह कृषिकार्यं कुरु।''
भूमातुः उपदेशं मनसि निधाय पृथुवैन्यः नदीनां मार्गम् अवरुध्य कृषिकार्यार्थं जलस्य उपयोगम् अकरोत्। वृष्टिजलसञ्चयं कृत्वा जलव्यवस्थापनम् अकरोत्। भूमिम् उर्वरतमां कर्तुं प्रायतत। तदनन्तरं तस्मिन् क्षेत्रे जनाः धान्यबीजानि अवपन्। स नैकेभ्यः वृक्षेभ्यः विविधप्रकारकाणां बीजानां सङ्कलनं चयनं च परिश्रमेण अकरोत्। अनन्तरं बीजानां संस्करणं कृत्वा वपनम् अकरोत् ।

१. अवबोधनम्। (४ तः ३) ③

**क) उचितं कारणं चित्वा वाक्यं पुनर्लिखत ।** १

भूम्या धनधान्यपुष्पफलानि स्व-उदरे निहितानि यतः .......।

१) वेनभूपः दुःशासकः आसीत् ।

२) तस्य प्रजाजनाः पशुवत् जीवन्ति ।

**ख) कः कं वदति?** १

''त्वं तु प्रजाहितदक्षः नृपः ।'' १

**ग) पूर्णवाक्येन उत्तरं लिखत ।**

भ्रमणसमये पृथुराजेन किं दृष्टम् ?

**घ) वाक्यं पुनर्लिखित्वा सत्यम्/असत्यम् इति लिखत ।** १

पृथुभूपः वृष्टिजलसञ्चयं कृत्वा जलव्यवस्थापनम् अकरोत् ।

**२) प्रवाहि-जालं पूरयत ।** २




इ) गद्यांशं पठित्वा सरलार्थं लिखत । (२ तः १) ४

क) शक्रः - (कर्णमुपगम्य) भोः कर्ण, महत्तरां भिक्षां याचे ।
कर्णः - दृढं प्रीतोऽस्मि भगवन् । एषोऽहं नमस्करोमि ।
शक्रः - (आत्मगतम्) किं नु खल्वहं वदामि ? यदि दीर्घायुर्भवेति वदेयं दीर्घायुर्भवेत् । यदि न वदेयं मूढ इति मां परिभवति ।

| |
|---|
| ख) श्रोतृवृन्दः – भोः पुराणिकवर्य, कथं नदी अस्माकं माता ? कीदृशाः नदीनाम् उपकाराः ?<br>कीर्तनकारः – शृणुत आर्याः शृणुत । अतिप्राचीना खलु एषा कथा । अस्ति विश्वामित्रः नाम कुशिकपुत्रः मुनिवरः। सपरिवारं, सगोधनं सः दूरतः आगतः । |

**ई) माध्यमभाषया उत्तरं लिखत । (२ तः १)** २

१) शङ्करेण संन्यासार्थं कथम् अनुमतिः लब्धा ?

२) 'स नरः शत्रुनन्दनः' इति वचनं 'व्यसने मित्रपरीक्षा' इति पाठस्य आधारेण स्पष्टीकुरुत ।

## तृतीयः विभागः – पद्यम्। (१२)

**३) अ) पद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत। (५ तः ४)** ४

| |
|---|
| घटं भिन्द्यात् पटं छिन्द्यात् कुर्याद्रासभरोहणम् ।<br>येन केन प्रकारेण प्रसिद्धः पुरुषो भवेत् ।।<br>यत्र विद्वज्जनो नास्ति श्लाघ्यस्तत्राल्पधीरपि ।<br>निरस्तपादपे देशे एरण्डोऽपि द्रुमायते ।।<br>अयं न भक्तो न च पूजको वा<br>घण्टां स्वयं नादयते तथापि ।<br>धनं जनेभ्यः किल याचतेऽयं<br>न याचको वा न च निर्धनो वा ।। |

**क) पूर्णवाक्येन उत्तरं लिखत ।** १

नरः किं छिन्द्यात् ?

**ख) विशेषण–विशेष्ययोः मेलनं कुरुत।** १

| विशेषणम् | विशेष्यम् |
|---|---|
| १) निरस्तपादपे | अल्पधीः |
| २) श्लाघ्यः | देशे |
| | विद्वज्जनः |

ग) **पद्यांशात् जालरेखाचित्रं पूरयत ।** १




**घ) २ तृतीयाविभक्त्यन्ते पदे लिखत ।** १

**च) लकारं लिखत। अयं जनेभ्यः धनं याचते ।** १

आ) **पद्ये शुद्धे पूर्णे च लिखत। (३ तः २)** ४

१. अल्पानामपि .............. मत्तदन्तिनः ।।

२. तावद् .............. यथोचितम् ।।

३. रामाभिषेके .............. ठंठंठः ।।

इ) **माध्यमभाषया सरलार्थं लिखत। (२ तः १)** २

१. शीलं सद्गुणसम्पत्तिः ज्ञानं विज्ञानमेव च ।

उत्साहो वर्धते येन वाचनं तद् हितावहम् ।।

२. एकीभूय यथा सर्वे वर्णा गच्छन्ति शुक्लताम् ।

तथा सम्भूय शंसन्ति धर्मा मानवतागुणम् ।।

ई) **माध्यमभाषया उत्तरं लिखत । (२ तः १)** २

१. वाचनमुपकारकं कथम् इति स्पष्टीकुरुत ।

२. 'विद्या नाम नरस्य.......' इति श्लोकाधारेण विद्यायाः महत्त्वं लिखत ।

**चतुर्थः विभागः – लेखनकौशलम् । (४)(३ तः २)**

४ अ) **विशिष्टविभक्तेः उपयोगं कृत्वा वाक्यनिर्माणं कुरुत । (४ तः २)** २

१. दा (१ प.प.) २.सह ३. रुच्-रोच् ४. नमः

आ) **संस्कृतानुवादं कुरुत । (४ तः २)** २

१. मी शेतकरी आहे.

मै किसान हूँ ।

I am a farmer.

२. माझा प्रिय प्राणी मांजर आहे.

'बिल्ली' मेरा प्रिय पशू हैं ।

A cat is my favourite animal.

३. विद्यार्थी ग्रंथ वाचतात.

छात्र ग्रंथ पढ़ते है ।

Students read a treatise.

४. सैनिक शत्रूंपासून देशाचे रक्षण करतात.

जवान शत्रुओं से देश की रक्षा करते हैं ।

Soldiers protect the nation from the enemies.

इ) **अमरकोषात् समानार्थकं शब्दं योजयित्वा वाक्यं पुनर्लिखत। (४ तः २)** २

१. अरण्ये मृगः काकः च स्नेहेन निवसतः ।

२. चतुर्भिः कनकं परीक्ष्यते ।

३. भूमिः स्त्रीरूपं धृत्वा प्रकटिता ।

४. वैद्यः प्राणान् धनानि च हरति ।

## पञ्चमः विभागः – भाषाभ्यासः । (८)

५) अ) पृथक्करणं कुरुत । ४

क) नामानि सर्वनामानि च पृथक्कुरुत । (५ तः ४) २

| नाम | सर्वनाम |
|---|---|
| .............. | .............. |
| .............. | .............. |

(मञ्जूषा – वाचा, अस्मासु, तस्मात्, आत्मनि, अनेन)

ख) क्रियापदानि धातुसाधित-विशेषणानि च पृथक्कुरुत। (५ तः ४) २

| क्रियापदम् | धातुसाधितविशेषणम् |
|---|---|
| .............. | .............. |
| .............. | .............. |

(मञ्जूषा – प्रारभते, रक्षितव्यम्, अचिन्तयत्, कृतवान्, दद्यात्)

आ) निर्दिष्टाः कृतीः कुरुत । (४ तः २) ४

१) संख्या/क्रम/आवृत्तिवाचकस्य योग्यं पर्यायं चित्वा वाक्यं पुनर्लिखत। (३ तः २) २

क) छात्रः दिनस्य ........... (२) अध्ययनं करोति । (द्विवारम्/ द्वौ)

ख) आर्यभट्टः इति भारतवर्षेण प्रेषितः ............. (१) उपग्रहः । (प्रथमः / एकवारम्)

ग) धनिकः ............(८) ब्राह्मणेभ्यः दक्षिणां यच्छति । (अष्टमः / अष्टभ्यः)

२) समासविग्रहाणां समासनामभिः मेलनं कुरुत । (६ तः ४) २

| समासविग्रहः | समासनाम |
|---|---|
| १) दारपोषणे रताः । | १) बहुव्रीहिः । |
| २) कवयः च पण्डिताः च । | २) अव्ययीभावः । |
| ३) नीलः कण्ठः यस्य सः । | ३) सप्तमी तत्पुरुषः । |
| ४) कुम्भं करोति इति । | ४) कर्मधारयः । |
| ५) शक्तिम् अनुसृत्य । | ५) इतरेतर-द्वन्द्वः । |
| ६) प्रिया भाषा । | ६) उपपद तत्पुरुषः । |

३) मञ्जूषातः समानार्थकशब्दान्/विरुद्धार्थकशब्दान् चित्वा लिखत। २

(मञ्जूषा – गगनम्, मुक्तः, जाह्नवी, दुर्गुणः)

क) गङ्गा = .......... ।     ख) सद्गुणः × .......... ।

ग) नभः = .......... ।     घ) बद्धः × .......... ।

४) योग्यं पर्यायं चिनुत । (३ तः २) २

क) क्षेत्रपतिना पाशः योजितः । (कर्तृवाच्यम् / कर्मवाच्यम्)

ख) ............. तण्डुलान् आनयतु । (त्वम् / भवान्)

ग) ग्रामः............ वृक्षैः शोभते । (उन्नतैः / उन्नतानाम्)

***